World Wide Journal of Multidisciplinary Research and Development




WWJMRD 2020; 6(8): 40-43
www.wwjmrd.com
*International Journal*
*Peer Reviewed Journal*
*Refereed Journal*
*Indexed Journal*
*Impact Factor MJIF: 4.25*
E-ISSN: 2454-6615

**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College Cuttack, Odisha, India

**Correspondence:**
**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College Cuttack, Odisha, India

# The analysis of Hereditary Transmission by virtue of Sanskrit Literature

## Dr. Menakarani Sahoo

**Abstract**
There are two categories of hereditary traits found in a child i.e. physical traits and mental traits. Physical traits include eye-colour, white forelock of hair, colour-blindness, blood type, skin colour, height and several other bodily features. Mental traits include intelligence and musical talents etc. So, every child comes to the world with certain physical and mental characteristics. He has adopted the qualities from his parents and ancestors. O.B Douglas and B.F holland define heredity as "one's heredity consists of all the structures, physical characteristics, functions or capacities derived from parents' other ancestry or species". The influence of biological inheritance on the development of an individual has been viewed in Sanskrit literature. Ravan, Kumbhakarna and Vibhishana were the son of Vishrava and Kaikeshi. The character of Ravan and Kumbhakarna is similar to their mother but the character of Vibhishana is similar to his father. We can observe the influence of hereditary transmission on Ramayana, Mahabharat, Madhyamavyayoga, Raghuvamsa, Uttararamacarita and Abhijnanasakuntala.

**Keywords:** वंशानुक्रमः, प्रकृतिस्थः, कुशिकसुतमखद्विषां, जृम्भकास्त्रं, कृशाश्वतनया

**उपक्रमः**

मनोवैज्ञानिकानां मतानुसारेण पित्रोः रूपसादृश्यगुणानाञ्च संक्रमणमेव वंशानुक्रमः भवति। तद्यथा- जेम्स ड्रेवर (James Drever) महेदयानुसारेण पित्रोः शारीरिकमानसिक गुणानां सन्तानेषु संक्रमणमेव वंशानुक्रमः भवति। तेन प्रोक्तम् – "Heredity is the transmission from parents to offspring of physical and mental characteristics" – James Drever.[i]

पीटर्सन (H.A. Peterson) महोदयानुसारमपि मातुः पितुश्च विशिष्टगुणान् सन्तानेषु प्राप्यते। अतः पूर्वजानां गुणानां संक्रमणमेव वंशानुक्रमः भवति। यथा – "Heredity may be defined as what one gets from his ancestral stock through his parents" - H. A. Peterson.[ii]

सम्भोगसमये स्त्री यादृशं पुरुषं भजते तादृशमेव सुतं जायते। अतः आचार्यमनुना प्रोक्तम् –

यादृशं भजते हि स्त्री सुतं सूते तथाविधम्।
तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः॥ [iii]

अतः ज्ञायते यतः पितुः रुपगुणान् पुत्रे संक्रमति। स्त्री क्षेत्ररुपेण पुरुषः बीजरुपेण संसारेऽस्मिन् विदितौ। अतः नारीपुरुषयोः संयोगादेव देहिनामुत्पत्तिः इति आचार्यमनुना प्रोक्तम्। यथा –

क्षेत्रवीजसमायोगात् सम्भवः सर्वदेहिनाम्॥ [iv]

अचार्यमनुमहोदयानुसारं कुत्र बीजं विशिष्टं भवति। कुत्रापि क्षेत्रं प्रधानं भवति। परन्तु अनयोः यदि समभावं वर्तते तर्हि प्रसूतिः (पुत्रः कन्या वा) प्रशस्यते। अतः मनुना प्रोक्तम् –

विशिष्टं कुत्रचिद् बीजं स्त्रीयोनिस्त्वेव कुत्रचित्।
उभयं तु समं यत्र सा प्रसूतिः प्रशंस्यते॥ [v]

**वंशनुक्रमस्य प्रभावः संस्कृतसाहित्येषु दरीदृश्यते । रामायणे लङ्कापतिरावणः, विभीषणः, कुम्भकर्णश्च विश्रवाऋषेः कैकस्याश्च पुत्राः । विश्रवाऋषेः सत्त्वगुणस्य प्रभावः विभीषणस्योपरि भवति । रावणकुम्भकर्णयोः उपरि मातुः कैकस्याः तामसिकगुणानां प्रभावः परिदृश्यते । यतः तेषां माता असुरकुले जाता । विष्णुपुराणे अपि वंशानुक्रमस्य प्रभावः दरीदृश्यते । प्रह्लादः विष्णुभक्तः आसीत् । अतः तस्य पुत्रः विरोचनः पौत्रः बलिश्च सत्त्वगुणयुक्तौ आस्ताम् । यदा वामनरुपधारी विष्णुः वामनावतारं नीत्वा बलेः समीपे आगत्य वसुधां याचितवान् तदा बलिः दानस्वरुपं त्रिपादपरिमितभूमिं दत्तवान् ।**

**संस्कृतसाहित्ये वंशानुक्रमस्य प्रभावः**

**भासस्य कृतिषु वंशानुक्रमस्य प्रभावः**

भासरचितमध्यमव्यायोगे वंशानुक्रमस्य संक्रमणं घटोत्कचे कथमभवत् इति भीमेन कथितम् –

भ्रातॄणां मम सर्वेषां कोऽयं भो! गुणतस्करः ।
दृष्ट्वैतद् बालशौण्डीर्यं सौभद्रस्य स्मराम्यहम् ॥ [vi]

अर्थात् भीमस्य भ्रातॄणां गुणानुकारी अयं घटोत्कचः । अस्यौद्धत्यं दृष्ट्वा कृष्णभगिन्याः सुभद्रायाः पुत्रस्य अभिमन्योः स्मरणमायाति । अतः घटोत्कचस्य समीपे पाण्डवानां गुणान् वंशनुक्रमस्य प्रभावेण दरीदृश्यते ।

मध्यमव्यायोगे यदा भीमः ज्ञातवान् यत् घटोत्कचः तस्य हिडिम्बायाश्च पुत्रः आसीत् तदा तेन प्रोक्तम् – 'रुपं सत्त्वं बलं चैव पितृभिः सदृशं बहु' । [vii]

भासस्य प्रतिमानाटके भरतस्याकृतिः रामस्याकृतिरिव भवति । यतः रामभरतश्च द्वौ दशरथस्य पुत्रौ । अतः तयोः आकृतिसाम्यमादर्शसाम्यञ्चास्ताम् । अतः लक्ष्मणेन प्रोक्तम् –

अयं ते दयितो भ्राता भरतो भ्रातृवत्सलः ।
संक्रान्तं यत्र ते रुपमादर्श इव तिष्ठति ॥ [viii]

**कालिदासस्य कृतिषु वंशानुक्रमस्य प्रभावः**

रघुवंशमहाकाव्यस्य नवमसर्गे वंशानुक्रमस्य प्रभावः दशरथस्योपरि अनुभूयते । पृथिवी रघुमजञ्च प्राप्य यथा शोभान्विता आसीत् तथैव दशरथं प्राप्य तस्याः शोभा पुनः वर्द्धते । अतः कालिदासेन प्रोक्तम्-

दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परम् ।
तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम् ॥ [ix]

पूर्वजानां सद्गुणानामनुकरणं पुत्रः पौत्रः प्रपौत्रश्च कुर्वन्ति । रघुवंशीयराजानः याचकानामभिलाषं पूरयितुं प्राणान् त्यक्तुं समर्थाः आसन् । अतः वंशस्य सदगुणानां संक्रमणं भवतीति कालिदासः दशरथस्य मुखेन प्रमाणितवान् । अतः यदा विश्वामित्रः ताडकावधार्थं यज्ञस्य विघ्ननिराकरणार्थं दशरथाय रामं याचितवान् तदा दशरथेन प्रोक्तम् –

कृच्छ्रलब्धमपि लब्धवर्णभाक्तं दिदेश मुनये सलक्ष्मणम् ।
अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता ॥ [x]

यदा लवकुशौ रामायणस्य गानं कृतवन्तौ तदा लवकुशयोः रामस्य च सादृश्यं वीक्ष्य अयोध्यायाः जनाः रामस्य कुमारवस्थायाः स्मरणमकुर्वन् । अतः कालिदासेन प्रोक्तम् –

वयोवेषविसम्वादि रामस्य च तयोस्तदा ।
जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत ॥ [xi]

वंशानुक्रमानुसारं संस्कारणां संक्रमणमपि भवति । अतः रामलक्ष्मणभरतशत्रुघ्नादीनां मध्ये यथा भ्रातृप्रेम आसीत् तथैव भ्रातृप्रेम लव-तक्ष- पुष्कल-सुबाहु- सुकृत-अङ्गद–चित्रकेत्वादीनां मध्ये आसीत् । अतः भ्रातृप्रेम कुलस्य क्रमागतधर्मः भवति । अतः कालिदासेन प्रोक्तम् –

अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च ।
चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां हि कुलानुसारि ॥ [xii]

पितुः रुपसादृश्येन सह गुणानामपि संक्रमणं पुत्रे भवति । रघुवंशमहाकाव्ये वयं पश्यामः यत् कुशस्य सर्वान् गुणान् तस्य पुत्रस्य अतिथेः समीपे प्राप्यते । अतः कालिदासेन प्रोक्तम् –

जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः ।
अमन्यतैकमात्मानमनेकं वशिना वशी ॥ [xiii]

अभिज्ञानशाकुन्तले यदा दुष्यन्तेन बाणः प्रतिसंहृतः तदा वैखानसः तस्मै प्रोवाच– ''सदृशमेवैतत् पुरुवंशप्रदीपस्य भवतः' । पुरुवंशप्रदीपानां कार्यमाश्रमवासीनां रक्षणम्'' । अतः वैखानसः तस्मै आशीर्वादं दत्तवान् –

जन्म यस्य पुरोर्वंशे युक्तरुपमिदं तव ।
पुत्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि ॥ [xiv]

अतः पितुः तथा पितृवंशानुसारं गुणान् सन्तानेषु प्राप्यते । अतः मनुमहोदयानुसारं यस्य वीजस्य वपनं यथा भवति तस्योत्पत्तिः तथैव भवति । अतः आचार्यमनुना प्रोक्तम् –

अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते ।
उप्यते यद्धि तद्बीजं तत्तदेव प्ररोहति ॥ [xv]

अपिच –

यादृशं तूप्यते वीजं क्षेत्रे कालोपपादिते ।
तादृग्रोहति तत्तस्मिन् वीजं स्वैर्व्यञ्जितं गुणैः ॥ [xvi]

अनसूयामुखात् शकुन्तला मेनकाविश्वामित्रयोः कन्येति राजा दुष्यन्तः ज्ञातवान् । मेनकायाः कन्या शकुन्तला भवति, अतः मातुः सौन्दर्यस्य, पितुः विश्वामित्रस्य तेजसः प्रभावः शकुन्तलायां परिलक्ष्यते । अतः राज्ञा दुष्यन्तेन प्रोक्तम् –

मानुषीभ्यः कथं नु स्यादस्य रुपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ [xvii]

अभिज्ञानशाकुन्तलस्य सप्तमेऽङ्के यदा राजा दुष्यन्तः सर्वदमनस्य पराक्रमं दृष्टवान् तदा तेन प्रोक्तम् –

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधोऽपेक्ष इव स्थितः ॥ [xviii]

अर्थात् अयं बालकः कस्यापि महापुरुषस्य तेजसो बीजमिव प्रतीयते ।

दुष्यन्तसर्वदमनयोः आकृतिसादृश्यं दृष्ट्वा तापस्युक्तवती – 'अस्य बालकस्य असम्बद्धेऽपि भद्रमुखे संवादिनी आकृतिरिति विस्मितास्मि । अपि च वामशीलोऽपि भूत्वा अपरिचितस्यापि ते वचनेन प्रकृतिस्थः संवृत्तः' । अर्थात् सर्वदमनस्याकृतिः दुष्यन्तस्याकृतिः इव भवति । अनेन प्रमाणितं यत् वंशानुक्रमस्य संक्रमणं भवत्येव ।

**भवभूतेः उत्तररामचरिते वंशानुक्रमस्य प्रभावः**

उत्तररामचरितस्य चतुर्थेऽङ्के यदा कौसल्या लवकुशौ दृष्टवती तदा तयोः रामचन्द्रस्य शैशवकालीनसुषमा दरीदृश्यते । यथा 'सुलभसौख्यं तावद् बालत्वं भवति । अहो! एतेषां मध्ये क एष रामभद्रस्य कौमारलक्ष्मीसदृशैः सावष्टम्भैर्मुग्धललितैरङ्गैरस्माकं लोचनानि शीतलयति ।' [xix]

आचार्यमनुमहोदयानुसारं पतिः भार्यां गर्भे संप्रविश्य पुत्ररुपेण जायते । अतः

मनुना प्रोक्तम् –

पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥ [xx]

अरुन्धत्यपि तौ दृष्ट्वा उक्तवती यत् रघुनन्दनः पुनः शिशुरिव प्रतीयते । तद्यथा –

पुनरपि शिशुर्भूतो वत्सः स मे रघुनन्दनो ।
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥ [xxi]

कौसल्या लवमुत्सङ्गे गृहीत्वा उक्तवती – "अहो । न केवलं दरविकसन्नीलोत्पलश्यामलोज्ज्वलेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसनिनाददीर्घदीर्घेण स्वरेण च रामभद्रमनुहरति । ननु कठोरकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृश एव वत्सस्य । जात! प्रेक्षे तावत्ते मुखपुण्डरीकम् । राजर्षे । किं न प्रेक्षसे निपुणं निरुप्यमाणमस्य मुखं वत्साया वध्वा मुखचन्द्रेण संवदत्येव ।"[xxii] अर्थात् लवस्य मुखकमलं रामभद्रस्य सीतायाः मुखकमलमिव प्रतिभाति ।

जनकोऽपि तस्मिन् बालके लवे सीतारामयोराकृत्यादिकं निरुप्य आह – अस्मिन् बालके सीतारामयोः समग्रा आकृतिः, कान्तिश्चाविकलं सङ्क्रान्तेव स्पष्टं लक्ष्यते । रामकण्ठध्वनिरिव अस्य कण्ठध्वनिः, रामस्येव नैसर्गिकविनयः अस्मिन् बालके परिलक्ष्यते । एतानि सर्वाणि लक्षणानि दृष्ट्वा प्रतीयते तयोरेवायमात्मजेति । यथा –

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
सम्पूर्णप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा दैव किमुत्पथैर्मम मनः पारिप्लवं धावति ॥[xxiii]

सुमन्त्रः अपि लवं दृष्ट्वा स्मरति यत् अयं शिशुः सुरेभ्योऽसुरेभ्यश्चाधिकसामर्थ्यशाली तथा रामेण समं दृश्यते । अतः एनं शिशुमवलोक्य विश्वामित्रयज्ञस्य विघातकानां सुबाहुप्रभृतीनां राक्षसानां विनाशाय धृतशरासनं श्रीरामचन्द्रं स्मरामि । बाल्ये श्रीरामोऽप्येवंविध आसीत् । तेन प्रोक्तम् -

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तथैव तुल्यरुपम् ।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥ [xxiv]

जृम्भकास्त्रं महामुनिः कुशाश्वः विश्वामित्राय प्रदत्तवान् । महर्षिः विश्वामित्रः ताटकावधार्थं प्रसादरुपेण रामाय प्रदत्तवान् । अतः रामः 'सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति' इत्याशीर्वादं सीतायै दत्तवान् । अतः लवकुशयोः जृम्भकास्त्रज्ञानमासीत् इति उत्तररामचरितस्य पञ्चमेऽङ्के दरीदृश्यते । यदा लवः जृम्भकास्त्रस्यामन्त्रणं कृतवान् तदा सुमन्त्रेण प्रोक्तम् –

कृशाश्वतनया ह्येते कृशाश्वात्कौशिकं गताः ।
अथ तत्सम्प्रदायेन रामभद्रे स्थिता अपि ॥ [xxv]
अनेन प्रतीयते पितुः विशिष्टगुणान् पुत्रे संक्रमति ।

**उपसंहारः**

सुक्षेत्रे सुबीजं यथा सम्पद्यते तथैव आर्यपुरुषात् योग्यसन्तानस्य प्राप्तिर्भवति । अतः आचार्यमनुना प्रोक्तम् –

सुवीजं चैव सुक्षेत्रे जातं सम्पद्यते यथा ।
तथार्याज्जात आर्यायां सर्वं संस्कारमर्हति ॥[xxvi]

बीजक्षेत्रयोः यथा सम्बन्धः तथैव एकस्य सन्तानस्य सम्बन्धः मात्रा पित्रा च सार्द्धं भवति । अतः मनुना प्रोक्तम् –

बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः ।
बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः ॥ [xxvii]

अक्षेत्रे बीजं फलप्रदानात्पूर्वं विनश्यति । यतः वंशानुक्रमस्य प्रभावः मनुष्यस्योपरि पतति । अतः संस्कारस्यानुगुणमेव कार्यं कुर्यात् । अतः आचार्यमनुनोपदिष्टम् –

अक्षेत्रे वीजमुत्सृष्टमन्तरैव विनश्यति ।
अवीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥ [xxviii]

## References


1. अमरसिंह-प्रणीतः, अमरकोषः(१९६९ ई)— संक्षिप्त माहेश्वरी टीका सहित, दशम संस्करण, निर्णय सागर प्रकाशन, मुम्बई, ४०००० २
2. गुप्ता, प्रो० एस० पी०, गुप्ता, डॉ० अलका (२०१२) : उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, यूनिवर्सिटी रोड, इलाहाबाद, २११००२,
3. त्रिपाठी, डॉ० रमाकान्त (२०१३): महाकविभवभूतिप्रणीतम् उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २२१००१
4. त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२२१००१
5. मालवीय, डॉ० सुधाकर (२०१०) : भासनाटकचक्रम् (प्रथमो भागः), चौखम्बा कृष्णदास अकादमी, वाराणसी, २२१००१
6. राय, डॉ० गङ्गासागर (वि.सं.२०६५) : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, २२१००१
7. स्वाईं, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार,पुरी, ओडिशा, ७५२००१


[i] गुप्ता, प्रो० एस० पी०, गुप्ता, डॉ० अलका (२०१२) : उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, यूनिवर्सिटी रोड, इलाहाबाद, २११००२, पृ.सं-७९

[ii] गुप्ता, प्रो० एस० पी०, गुप्ता, डॉ० अलका (२०१२) : उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, यूनिवर्सिटी रोड, इलाहाबाद, २११००२, पृ.सं-७९

[iii] स्वाईं, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-४५९

[iv] स्वाईं, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-४६५

[v] स्वाईं, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-४६५

[vi] मालवीय, डॉ० सुधाकर (२०१०) : मध्यमव्यायोगः, भासनाटकचक्रम् (प्रथमो भागः), चौखम्बा कृष्णदास अकादमी, वाराणसी, २२१००१, पृ.सं- ४६

[vii] मालवीय, डॉ० सुधाकर (२०१०) : मध्यमव्यायोगः, भासनाटकचक्रम् (प्रथमो भागः), चौखम्बा कृष्णदास अकादमी, वाराणसी, २२१००१, पृ.सं- ५०

[viii] मालवीय, डॉ० सुधाकर (२०१०) : प्रतिमानाटकम्, भासनाटकचक्रम् (प्रथमो भागः), चौखम्बा

[ix] त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२२१००१, पृ.सं-२७९

[x] त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२२१००१, पृ.सं-३५१

[xi] त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२२१००१, पृ.सं- ५१७

[xii] त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२२१००१, पृ.सं-५३०

[xiii] त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२२१००१, पृ.सं-५६६

[xiv] राय, डॉ० गङ्गासागर : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०६५, पृ.सं -२१

xv स्वाईँ, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-४६७

xvi स्वाईँ, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-४६६

xvii राय, डॉ० गङ्गासागर : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०६५, पृ.सं -५१

xviii राय, डॉ० गङ्गासागर : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०६५, पृ.सं -३५०

xix त्रिपाठी, डॉ० रमाकान्त : महाकविभवभूतिप्रणीतम् उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३, पृ.सं- २६१

xx स्वाईँ, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-४५९

xxi त्रिपाठी, डॉ० रमाकान्त : महाकविभवभूतिप्रणीतम् उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३, पृ.सं- २६३

xxii त्रिपाठी, डॉ० रमाकान्त : महाकविभवभूतिप्रणीतम् उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३, पृ.सं- २६९

xxiii त्रिपाठी, डॉ० रमाकान्त : महाकविभवभूतिप्रणीतम् उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३, पृ.सं- २७०

xxiv त्रिपाठी, डॉ० रमाकान्त : महाकविभवभूतिप्रणीतम् उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३, पृ.सं- २९५

xxv त्रिपाठी, डॉ० रमाकान्त : महाकविभवभूतिप्रणीतम् उत्तररामचरितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३, पृ.सं- ३११

xxvi स्वाईँ, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं- ५५४

xxvii स्वाईँ, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-५५५

xxviii स्वाईँ, डॉ० व्रजकिशोर (२०१०) : मनुसंहिता, सद्ग्रन्थनिकेतन, आनन्दबाजार, पुरी, ओडिशा, ७५२००१ , पृ.सं-५५५